श्रीगणपतिस्तवः

{॥ श्रीगणपतिस्तवः ॥}

श्री गणेशाय नमः ॥

ब्रह्मविष्णुमहेश्वरा ऊचुः।

अजं निर्विकल्पं निराकारमेकं निरालम्बमद्वैतमानन्दपूर्णम् ।

परं निर्गुणं निर्विशेषं निरीहं परं ब्रह्मरूपं गणेशं भजेम ॥ १॥

गुणातीतमाद्यं चिदानन्दरूपं चिदाभासकं सर्वगं ज्ञानगम्यम् ।

मुनिध्येयमाकाशरूपं परेशं परं ब्रह्मरूपं गणेशं भजेम ॥ २॥

जगत्कारणं कारणाज्ञानहीनं सुरादिं सुखादिं युगादिं गणेशम् ।

जगद्व्यापिनं विश्ववन्द्यं सुरेशं परं ब्रह्मरूपं गणेशं भजेम ॥ ३॥

रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं सदा कार्यसक्तं हृदाऽचिन्त्यरूपम् ।

जगत्कारकं सर्वविद्यानिधानं सदा ब्रह्मरूपं गणेशं नताः स्मः ॥ ४॥

सदा सत्त्वयोगं मुदा क्रीडमानं सुरारीन् हरन्तं जगत्पालयन्तम् ।

अनेकावतारं निजाज्ञानहारं सदा विष्णुरूपं गणेशं नताः स्मः ॥ ५॥

तमोयोगिनं रुद्ररूपं त्रिनेत्रं जगद्धारकं तारकं ज्ञानहेतुम् ।

अनेकागमैः स्वं जनं बोधयन्तं सदा शर्वरूपं गणेशं नताः स्मः ॥ ६॥

तमःस्तोमहारं जनाज्ञानहारं त्रयीवेदसारं परब्रह्मपारम् ।
मुनिज्ञानकारं विदूरे विकारं सदा ब्रध्नरूपं गणेशं नताः स्मः॥ ७॥

निजैरौषधैस्तर्पयन्तं करोघैः सुरौघान्कलाभिः सुधास्राविणीभिः ।
दिनेशांशुसन्तापहारं द्विजेशं शशाङ्कस्वरूपं गणेशं नताः स्मः ॥ ८॥

प्रकाशस्वरूपं नभोवायुरूपं विकारादिहेतुं कलाकालभूतम् ।
अनेकक्रियानेकशक्तिस्वरूपं सदा शक्तिरूपं गणेशं नताः स्मः ॥ ९॥

प्रधानस्वरूपं महत्तत्त्वरूपं धरावारिरूपं दिगीशादिरूपम् ।
असत्सत्स्वरूपं जगद्धेतुभूपं सदा विश्वरूपं गणेशं नताः स्मः ॥ १०॥

त्वदीये मनः स्थापयेदङ्घ्रियुग्मे जनो विघ्नसङ्घान्न पीडां लभेत ।
लसत्सूर्यबिम्बे विशाले स्थितेऽयं जनो ध्वान्तबाधां कथं वा लभेत ॥ ११॥

वयं भ्रामिताः सर्वथाऽज्ञानयोगादलब्ध्वा तवाङ्घ्रि बहून्वर्षपूगान् ।
इदानीमवाप्तास्तवैव प्रसादात्प्रपन्नान्सदा पाहि विश्वम्भराद्य ॥ १२॥

एवं स्तुतो गणेशस्तु सन्तुष्टोऽभून्महामुने ।
कृपया परयोपेतोऽभिधातुं तान् प्रचक्रमे ॥ १३॥

Stotram Digitalized By Sanskritdocuments.org

Proofread by Avinash Sathaye(sohum@ms.uky.edu)

Based on the गणेशपुराण उपासना खण्ड अध्याय १३

The stotra to गणपति by ब्रह्मा, विष्णु, महेश्वर as reported by

ब्रह्मा. It is followed by a response by गणेश himself to the three Gods.

गणपतिस्तवः पाठभेद}

श्री गणेशाय नमः ॥

ऋषिरुवाच ॥

अजं निर्विकल्पं निराकारमेकं निरानन्दमानन्दमद्वैतपूर्णम् ।

परं निर्गुणं निर्विशेषं निरीहं परब्रह्मरूपं गणेशं भजेम ॥ १॥

गुणातीतमानं चिदानन्दरूपं चिदाभासकं सर्वगं ज्ञानगम्यम् ।

मुनिध्येयमाकाशरूपं परेशं परब्रह्मरूपं गणेशं भजेम ॥ २॥

जगत्कारणं कारणज्ञानरूपं सुरादिं सुखादिं गुणेशं गणेशम् ।

जगद्व्यापिनं विश्ववन्द्यं सुरेशं परब्रह्मरूपं गणेशं भजेम ॥ ३॥

रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं सदा कार्यसक्तं हृदाऽचिन्त्यरूपम् ।

जगत्कारणं सर्वविद्यानिदानं परब्रह्मरूपं गणेशं नताः स्मः ॥ ४॥

सदा सत्ययोग्यं मुदा क्रीडमानं सुरारीन्हरन्तं जगत्पालयन्तम् ।
अनेकावतारं निजाज्ञानहारं सदा विश्वरूपं गणेशं नमामः ॥ ५॥

तमोयोगिनं रुद्ररूपं त्रिनेत्रं जगद्धारकं तारकं ज्ञानहेतुम् ।
अनेकागमैः स्वं जनं बोधयन्तं सदा सर्वरूपं गणेशं नमामः ॥ ६॥

तमस्स्तोमहारं जनाज्ञानहारं त्रयीवेदसारं परब्रह्मसारम् ।
मुनिज्ञानकारं विदूरे विकारं सदा ब्रह्मरूपं गणेशं नमामः ॥ ७॥

निजैरोषधीस्तर्पयन्तं कराद्यैः सुरौघान्कलाभिः सुधास्राविणीभिः ।
दिनेशांशुसन्तापहारं द्विजेशं शशाङ्कस्वरूपं गणेशं नमामः ॥ ८॥

प्रकाशस्वरूपं नमो वायुरूपं विकारादिहेतुं कलाधाररूपम् ।
अनेकक्रियानेकशक्तिस्वरूपं सदा शक्तिरूपं गणेशं नमामः ॥ ९॥

प्रधानस्वरूपं महत्तत्वरूपं धराचारिरूपं दिगीशादिरूपम् ।
असत्सत्स्वरूपं जगद्धेतुरूपं सदा विश्वरूपं गणेशं नताः स्मः ॥ १०॥

त्वदीये मनः स्थापयेदङ्घ्रियुग्मे जनो विघ्नसङ्घादपीडां लभेत ।
लसत्सूर्यबिम्बे विशाले स्थितोऽयं जनो ध्वान्तपीडां कथं वा लभेत ॥ ११॥

वयं भ्रामिताः सर्वथाऽज्ञानयोगादलब्धास्तवाङ्घ्रिं बहून्वर्षपूगान् ।

इदानीमवाप्तास्तवैव प्रसादात्प्रपन्नान्सदा पाहि विश्वम्भराद्य ॥ १२॥

एवं स्तुतो गणेशस्तु सन्तुष्टोऽभून्महामुने ।
कृपया परयोपेतोऽभिधातुमुपचक्रमे ॥ १३॥

इति श्रीमद्-गर्ग ऋषिकृतो गणपतिस्तवः सम्पूर्णः ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Prayer to Lord Ganesha

Salutations to Lord Ganesha.

Garga Rishi spoke thus:

1. Let us worship Lord Ganesha, the one who is unborn, beyond imagination, without definite form, beyond happiness, the absolute happiness, the one and only one, the best among the best, without material qualities, easily obtainable, desireless and the form of the Supreme.

2. Let us worship Lord Ganesha, the one who is transcendental to the material modes of nature, the form of the supreme happiness, one who can be experienced
through the mind, the all pervading, one who can be approached through

knowledge, meditated by sages, the form of the sky, the best of all and the form of the Supreme.

3. Let us worship Lord Ganesha, the one who is the cause for the existence of the Universe and the knowledge, Premier of the Gods, primal happiness, Lord of qualities, Lord of Deva group, one who pervades through the Universe, worshipped
by the Universe, Lord of the Gods and the one who symbolizes the Supreme.

4. Let us bow down to Lord Ganesha, the one who is beyond passion, the form of
the Creator, knower of the Vedas, always with the actions, the form that is inconceivable by heart, cause for the existence of the Universe, responsible for all knowledge and the one who symbolizes the Supreme.

5. Let us salute Lord Ganesha, the one who is manifestation of the truth, blissful, appeased by the activities of people, one who is victorious over demons, governs the Universe, who takes many incarnations, carries the supreme
knowledge and the form of Vishwarupa.

6. Let us salute Lord Ganesha, controller of tamas, the form of destruction, one who has three eyes, destructor of the Universe, the carrier across the bonds of life, the cause of knowledge, preaches to many people who seek Him and the form
of everything (Shiva).

7. Let us salute Lord Ganesha, the one who removes tamas qualities, removes ignorance of people, the essence of the three Vedas, the essence of the Supreme,

cause of knowledge in the sages, looks misshaped from distant and always the form of the Supreme.

8. Let us salute Lord Ganesha, the one who makes the plants happy by his rays, one who makes Gods happy by the tarpana of streams of nectar, one who cools down

the heat of the Sun, the best of the Brahmins and the one who is the form of the Moon.

9. Let us salute Lord Ganesha, the one who is the form of light, the form of

the sky, the form of wind, the cause for changes, one who supports the arts,

cause for many activities, form of strength and the form of Shakti.

10. Let us salute Lord Ganesha, the one who is important form of the nature,

great form of qualities, wanders over the Earth, form of Lord of the directions,

form of the existent and the non-existent, the cause for the Universe and always

the form of the Universe.

11. People who prostrate to your feet would be freed from obstacles. The one who

is like the shining Sun who is vast, when you are present, how would people be subjected to darkness?

12. We, who are illusioned, always linked with ignorance, we have bowed down

to

your feet. The Supreme one, the one who has the manifestation of the Universe,

it is because of your grace your feet are found, protect us.

13. O Great Sage! One who prays Lord Ganesha in the above mentioned way, is

happy. By His grace, I begin to pray Him to obtain the Supreme knowledge.

Thus ends the prayer to Lord Ganesha as recited by Garga Rishi.

Translation by Amith K Nagaraj

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Ganapathi Sthavam (By Garga Rishi) Lyrics in Devanagari PDF
% File name : gaNapatistavaH.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : webD
% Proofread by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj NA
% Translated by : Amith K Nagaraj amith at alcatel-lucent.com
% Description-comments : Avinash Sathaye gaNesha purANa (upAsanA khaNDa a. 13), Ajit Krishnan
% Latest update : April 13, 2007, January 20, 2009, July 13, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.

% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website